Postal Regd.No. GAMC- 1553/2016-2018 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १२ अङ्क : १४२
मार्च - २०१८

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2016-2018 issued by SSP Ahmedabad. Valid upto 31-12-2018. containing 8 pages ₹ 10

## चिन्तनम्

### त्रीणि द्वाराणि

अस्माकं जीवनस्य कोशे त्रयः धातवः महत्त्वं वहन्ति- ज्ञा (ज्ञानम्), कृ (कर्म), भज् (भजनम्, भक्तिः) च। मनुष्येण किमपि ज्ञातव्यम्, ज्ञात्वा किमपि करणीयम् । यच्च करणीयं तस्मिन् भावस्य सेचनं स्यात् इति नितरां चिन्तनीयम्।

किं मनुष्यः किमपि न जानाति ? सः किमपि न करोति ? किमपि नैव भजति ? मनुष्यः यत् वस्तुतः ज्ञातव्यम् अस्ति तत् न जानाति। यत् करणीयम् अस्ति तत् न करोति। यच्च भक्तव्यम् अस्ति तत् न भजति। किं ज्ञातव्यम् ? किं करणीयम् ? किञ्च भक्तव्यम् इति प्रश्नत्रयस्य उत्तरं भगवद्गीता ददाति। आधुनिके मनोविज्ञाने अपि अस्मिन् विषये गवेषणा दृश्यते।

१. ज्ञानं मनुष्यजीवनस्य बोधात्मकः खण्डः वर्तते। गीता तं सांख्ययोगेन विवृणोति। २. कर्म क्रियात्मकः खण्डः उच्यते। गीतायाम् अयं कर्मयोगः निर्दिष्टः। ३. भजनं जीवनस्य भावखण्डः वर्तते। गीता तं भक्तियोगेन व्याकुरुते।

मनुष्यस्य वर्तनं जटिलम् अस्ति। अतः एतत् विभाजनम् अपि वज्रलेपेन कर्तुं न शक्यते। जीवनं केवलं ज्ञानेन, कर्मणा भक्त्या वा न प्रवर्तते। त्रयाणां प्रमाणं प्रतिजनं स्वभावतः परिवर्तते। यथा हि रजनीशस्य जीवनं ज्ञानप्रधानम् आसीत्। महात्मा गान्धी कर्ममार्गम् अनुसृतवान्। भक्तिमार्गे वयं मीरां स्मर्तुं शक्नुमः। एते महामानवाः स्व-स्वभावेन कल्याणपथे चलितवन्तः।

उपरितनाः त्रयः गुणाः मनुष्यं पावयन्ति। एते सर्वे गुणाः एकस्मिन् एव जने मिलन्ति चेत् कथम् ? तेषां समन्वयः शङ्कराचार्ये दृश्यते। 'सर्वं मायामयं जगत्' इति घोषयन् शङ्कराचार्यः परमः ज्ञानी प्रतिभाति। 'तदपि न मुञ्चति पापाचरणम्' इति सत्कर्ममार्गम् आश्रितः सः कर्मशीलः इव दीव्यति। 'गतिस्त्वं गतिस्त्वमेका भवानि' इति भवानीमेव परमं शरणं मन्यमानः सः भक्तिमान् दृश्यते।

भगवता कृष्णेन परमतत्त्वं प्रति उत्सुकानां त्रीणि तेजोद्वाराणि उद्घाटितानि। एकमपि द्वारं कृते प्रयत्ने प्रवेष्टुं न शक्येत चेदपि उद्वेगः मास्तु। थोरो आश्वासयति- 'अहं ध्रुवप्रदेशं गन्तुं कदापि न शक्नुयाम् ततः मम नैराश्यं नास्ति। यतो हि तत्र गमने मया स्वप्नः दृष्टः। सा घटना स्वयं दिव्या अस्ति।'

✍ सतीशः गज्जर्

## कृपया हसन्तु

रमणः - (नमनम् उद्दीश्य) भोः मित्र ! अहम् अमेरीकां गन्तुं चिन्तयन् अस्मि, कति रूप्यकाणां व्ययः भविष्यति ?

नमनः - चिन्तनस्य कोऽपि व्ययः नास्ति ।

★ ★ ★ ★ ★

वैद्यः - (रुग्णम् उद्दीश्य) दीर्घं श्वासं स्वीकृत्य त्रिवारं 'सप्त' वदतु ।

रुग्णः - (दीर्घं श्वासं स्वीकृत्य) एकविंशतिः ।

★ ★ ★ ★ ★

शिक्षकः - (छात्रान् प्रति) श्वः आरभ्य परीक्षायाः आरम्भः भविष्यति । कोऽपि किमपि प्रष्टुम् इच्छति ?

रमणः - श्वस्तन परीक्षापत्रे के के प्रश्नाः सन्ति महोदय !

★ ★ ★ ★ ★

नमनः - (रमणं प्रति) विवाहानन्तरं जीवनं कथं भवति ? कृपया मार्गदर्शनं करोतु ।

रमणः - विवाहानन्तरं जीवनम् उत्तराखण्डम् इव भवति ।

नमनः - (साश्चर्यम्) उत्तराखण्डम् इव ? तत् कथम् ?

रमणः - तत्र सौन्दर्यं तु भवति किन्तु आपत्तयः अपि वारं वारम् आगच्छन्ति ।

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**गुरोर्गिरः पञ्चदिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च ।**
**अमी समाघ्राय च तर्कशास्त्रं समागताः कुक्कुटामिश्रपादाः ।**

आत्मानं पण्डितं मन्यमानः कश्चन आत्मानं वेषभूषादिभिः अलङ्कृत्य सभां प्रविष्टवान् । तं दूरात् एव दृष्ट्वा कश्चित् अन्यम् अवदत्– "अहो ! एतस्य पाण्डित्यम् ! एषः गुरोः सकाशात् पञ्च दिनानि यावत् विद्याभ्यासं कृतवान् । दिनत्रयं वेदान्तशास्त्रम् अपि अधीतम् एतेन । तर्कशास्त्रस्य आघ्राणनम् अपि एतेन कृतम् अस्ति । तादृशः 'महाविद्वान्' कुक्कुटमिश्रः एषः उपस्थितः" इति । अध्ययनकालः एव तदीयं 'पाण्डित्यं' किं न ज्ञापयति ?

**मातस्त्रयोदशि शुभे कुलरक्षिणी त्वं मत्कान्तसङ्गसुविधायिनि सर्वसिद्धे ।**
**भूयास्त्वमेव दश पञ्च च वासराणि मा भूत्कदाचिदपि पापतिथिर्द्वितीया ॥**

पारम्परिकाध्ययनक्रमे अनध्ययनानि (विरामदिनानि) त्रयोदशीतः प्रतिपत्पर्यन्तं भवन्ति । (शनिभानुवासरयोः न) कश्चन छात्रः विवाहानन्तरम् अपि पारम्परिकविद्यालये अध्ययनं कुर्वन् अस्ति । सः वदति– 'हे त्रयोदशि ! भवती सर्वसिद्धिकरी अस्ति । भवत्याः आगमनस्य अनन्तरं विरामस्य आरम्भः इत्यतः भवती एव भवेत् समग्रे पक्षे अपि । विरामदिनेषु एव पत्न्याः सङ्गमः सम्भवति । अतः भवती मम प्रिया । किन्तु वराकी द्वितीयातिथिः कदापि न भवेत् । यतः सा शालारम्भकारिणी अस्ति ।'